देवीदयालश्रीपाठीकस्य
मिदं पुस्तकम्॥पत्र॥४४॥

MS on astrology by Varāhamihira, entitled {Vrihat-jātaca Brihajjataka, written in 1817. He was one of the most famous Hindu (Ujjain) astronomers, & lived about 500 A.D.

छ जा.

१

श्रीरामायनमः॥ मूर्त्तित्वे परिकल्पितः शशिभृतो वर्त्मा ऽपुनर्जन्मनामात्मेत्यात्मविदां क्रतुश्च यज
तां भर्त्ता ऽमरज्योतिषां॥ लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतौ वाचं नः स ददात्वनेककि
रणस्त्रैलोक्यदीपो रविः॥१॥ भूयोभिः पटुबुद्धिभिः पटुधियां होराफलज्ञप्तये शब्दन्यायसमन्वितेषु ब
हुशः शास्त्रेष्वदृष्टेष्वपि॥ होरानन्तमहार्णवप्रतरणे भग्नोद्यमानामहं स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्र
प्लवं प्रारभे॥२॥ होरेत्यहोरात्रविकल्पमेके वांछन्ति पूर्वापरवर्णलोपात्॥ कर्मार्जितं पूर्वभवे सदादि यत्तस्य
पंक्तिं समभिव्यनक्ति॥३॥ कालांगानि वरांगमाननमुरो हृत्क्रोडवासोभृतो वस्तिर्व्यंजनमूरुजानुयुगले
जंघे ततोंघ्रिद्वयम्॥ मेषाश्विप्रथमा नवर्क्षचरणाश्चक्रस्थिता राशयो राशिक्षेत्रगृहर्क्षभानि भवनं चैकार्थ
संप्रत्ययाः॥४॥ मत्स्यौ घटी नृमिथुनं सगदं सवीणं चापी नरो ऽश्वजघनो मकरो मृगास्यः॥ तौली ससस्यदहना

मस्तक   कटिर् लिंग

उरः हृति क्रोडा   धान्यं अग्नि

पर्य्याय   वर्गम   कटी॥   नाभिलिंगपोमध्येवस्तिः॥

अन्यो न्यमुख पुच्छौ

राम.

२

शुक्रज्ञजीवशनिभूतनयस्य बाणा ५ शैलो ७ ष्ट ८ पंच ५ विशिखा ५ समराशिमध्ये ॥ त्रिंशांशको
विषमेभे विपरीतमस्याः द्रेःकाणका प्रथमपंचमनवाधिपानां ॥ ८

प्लवगाच कन्या शेषाः स्वनामसदृशाः स्वचराश्च सर्वे ॥ ५ ॥ क्षितिजसितज्ञचन्द्ररविसौम्यसितावनि
जाः सुरगुरुमंदसौरिगुरवश्च गृहांशकपाः ॥ अज मृगतौलिचंद्रभवनादिनवांशविधिर्भवन
समांशकाधिपतयः स्वगृहात्क्रमशः ॥ ६ ॥ कुजरविजगुरुज्ञशुक्रभागाः पवन ५ समीरण ५ कौ
तु४ र्पि ८ यूक ७ लेयाः ५ ॥ अयुजि युजि भे विपर्ययस्थाः शशिभवनालिझषांतमृक्षसंधिः ॥ ७
क्रियतावुरिजितुमकुलीरलेयपाथोनयूककौर्प्याख्याः ॥ तौक्षिकभोकोकेरोहृद्रोगश्चान्त्यभं
न४ चेत्यम् ॥ ८ ॥ द्रेःकाणहोरानवभागसंज्ञास्त्रिंशांशकद्वादशसंज्ञकाश्च ॥ क्षेत्रं च यद्यस्य स तु
स्य वर्गो होरेति लग्नं भवनस्य चार्द्धम् ॥ ९ ॥ गोऽजाश्विकर्किमिथुनाः समृगा निशाख्याः पृष्ठो शीर्षोदय
दया विमिथुनाः कथिताः स्त एव ॥ शीर्षोदया दिनबलाश्च भवंति शेषाः लग्नं समेत्युभयतः दयोदय
श्चापि ॥

शिर्षोदयाः ५ । ६ । ७ । ८ । ११ । १२ । विमिथुना दिनबलाः

वृ॰जा॰

२

पृथुलोमसुम्मम्॥१०॥ क्रूरःसौम्यःपुरुषवनितेतेचरागद्विदेहाःप्रागादीशाःक्रियवृषनृयुक्कर्कटाः

सत्रिकोणाः॥ मार्तंडेंद्वोरयुजिसमभेचंद्रभान्वोश्चहोरे द्रेष्काणास्युःस्वभवनसुतत्रित्रिको

णाधिपानाम्॥११॥ केचित्तुहोरांप्रथमांभपस्य वांछंतिलाभाधिपतेर्द्वितीयां॥ द्रेष्काणसंज्ञा

मपिवर्णयंतीस्व १ द्वादशै १२ कादश ११ राशिपानाम्॥१२॥ अजवृषभमृगांगनाकुलीराझ

षवणिजौचदिवाकरादितुंगा॥ दश १० शिखि ३ मनुयु २८ क्तिथी १५ न्द्रियांशै ५ स्त्रिनव

क २७ विंशति २० भिश्चतेस्तनीचाः॥१३॥ वर्गोत्तमाश्चरगृहादिषुपूर्वमध्यपर्यंतगाःशु

भफलाःनवभागसंज्ञाः॥ सिंहोवृषःप्रथमषष्ठहयांगतौलिकुंभास्त्रिकोणभवनानिभ

वंतिसूर्यात्॥१४॥ होरादयस्तनुकुटुंबसहोत्थबंधुपुत्रारिपत्निमरणानिशुभास्पदायाः॥

राम

२

म १

रिष्फाख्यमित्युपचयान्यरिकर्मलाभदुश्चिक्यसंज्ञितगृहाणि न नित्यमेके ॥१५॥ कल्यस्वविक्र
मगृहप्रतिभाक्षतानि चित्तोत्थरंध्रगुरुमानभवव्ययानि ॥ लग्नाच्चतुर्थनिधने चतुरस्रसंज्ञे ॥ द्यू
नं च सप्तमगृहं दशमर्क्षमाज्ञा ॥१६॥ कंटककेन्द्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थखभानामृ
तेषु यथाभिहितेषु बलाढ्याः कीटनराम्बुचराः पशवश्च ॥१७॥ केन्द्रात्परं पणफरं परतस्तु सर्वे
मापोक्लिमं हिबुकमंबु सुखं च वेश्म ॥ जामित्रमस्तभवनं सुतभं त्रिकोणं मेषूरणं दशम
मत्र च कर्म विद्यात् ॥१८॥ होरास्वामिगुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटाः केन्द्रस्था द्वि
पदादयो ऽह्नि निशि च प्राप्ते च संध्याद्वये ॥ पूर्वार्धे विषमाद्ययः कृतगुणा ॥ २०।२४।२५।३२।३६
४० मानं प्रतीपं च तद्दुश्चिक्यं सहजं तपश्च नवमं त्र्याद्यं त्रिकोणं च तत् ॥१९॥ रक्तः श्वेतः शु

त्रित्रिकोणं १

चपुनः अभि
निसिच संध्या
द्वये द्विपदादय
यः विर्योत्कट

केंद्रस्थाः
द्विपदाः
पणाफर
स्थाः चतुष्पदाः
आपोक्लिम
स्थाः जलचराः
बलिनः ॥

र॰ जा॰
२

३ ४ ५ ६ ७ ८ ९ १० ११ १२

कनिभतनुः पाटलो धूम्रपांडुः श्वित्रः कृष्णः कनकसदृशः पिंगलः कर्बुरश्च ॥ वभ्रुः स्वच्छः प्र
थमभवनाद्येषु वर्णाः प्लवत्वं स्वाम्याशाख्यां दिनकरयुताभ्द्वादितियंच वशिः ॥२०॥ इति
श्री आवंतिकाचार्य्य वराहमिहरकृते वृहज्जातके राशिप्रभेदो नाम प्रथमोध्यायः ॥१॥ ॥
कालात्मादिनकृन्मनस्तुहिनगुः सत्वं कुजो ज्ञो वचो जीवो ज्ञानसुखे सितश्च मदनो दुःखं
दिनेशात्मजः ॥ राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुधः सूरिर्दानवपूजितश्च
सचिवौ प्रेष्यः सहस्रांशुजः ॥१॥ हेलिः सूर्यश्चंद्रमाः शीतरश्मिर्हेम्नो वित्ज्ञो बोधनश्चेन्द्रपु
त्रः ॥ आरो वक्रः क्रूरदृक् चावनेयः कोणो मंदः सूर्यपुत्रो ऽसितश्च ॥२॥ जीवोंगिरा सुरगु
रुर्वचसां पतिरिज्यो भृगुः शुक्रो भृगुः भृगुसुतः सित आस्फुजिच्च ॥ राहुस्तमो ऽगुरसुरश्च शिखि

अथ सूर्यादीनां पर्यायानाह हेलि इत्यादि

राम॰
२

कूचार

वकेतुः पर्यायमन्यमुपलभ्य वदेच्च लोकात्॥३॥ रक्तस्यामो भास्करो गौर इंदुर्नात्युच्चांगो
भौमः गौररक्तश्च वक्रः॥ दूर्वास्यामो ज्ञो गुरू गौरगात्रं श्यामः शुक्रो भास्करिः कृष्णदेहः॥४॥ वर्णास्ता रिः
म्रशितातिरक्तहरितव्यापीतचित्राशिताव ह्न्यं[illegible]ग्निजकेशवेंद्रशचिकाः सूर्यादिनाथाः
क्रमात्॥ प्रागाद्या रविशुक्रलोहिततमः सौरेंदुविड्सूरयः॥ क्षीणेंदुर्कमहीसुतार्कतनयाः शचिगा
कार्तिकेयः पापा बुधस्तैर्युतः॥५॥ बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः॥
शिखिभूखपयोमरुद्गणानां वशिनो भूमिसुतादयः क्रमेण॥६॥ विप्रादितः शुक्रगु
अग्निः रू कुजार्कौ शशी बुधश्चत्यऽसितोंत्यजानां॥ चन्द्रार्कजीवा ज्ञसितौ कुजार्की यथाक्रमं स
वं २ त्वरजस्तमांसि॥७॥ मधुपिंगलदृक् चतुरस्रतनुः पित्तप्रकृतिः सविताल्पकचः॥८॥

पृथ्वी ३ आकाश २ जल वायु ३

कृ २१ अव्यक्त= नम स्नाय

बृ.जा.

४

र्तनु वृत्ततनुर्बहुवातकफः प्राज्ञश्च शशी मृदुवाक्शुभदृक् ॥८॥ क्रूरदृक्तरुणमूर्तिरुदारः मू.नि.दृ. १
पैत्तिकः सुचपलः कृशमध्यः ॥ श्लिष्टवाक्सततहास्यरुचिर्ज्ञः पित्तमारुतकफप्रकृतिश्च
॥९॥ बृहत्तनुः पिंगलमूर्द्धजेक्षणो बृहस्पतिः श्रेष्ठमतिः कफात्मकः ॥ भृगुः सुखी कां
तवपुः सुलोचनः कफानिलात्मासितवक्रमूर्द्धजः ॥१०॥ मंदोलसः कपिलदृक्कृशदीर्घ
गात्रः स्थूलद्विजः परुषरोमकचोनिलात्मा ॥ स्नाय्वस्थ्यसृक्त्वगथ शुक्रवसा च मज्जा मं
दार्कचंद्रबुधशुक्रसुरेज्यभौमाः ॥११॥ देवांबुग्निविहारकोशशयनक्षित्युत्करैशाः क्र
मात् वस्त्रं स्थूलमभुक्तमग्निकहतं मध्यं दृढं पाटितम् ॥ ताम्रं स्यान्मणिहेमयुक्तिरज
तान्यर्कात्तु मुक्तायसी ॥ द्रेष्काणैः शिशिरादयः शकुचन्द्रज्ञादिषु घत्सुवा ॥१२॥ त्रि

रोमकेश=

दंत:=

अस्थि ला ऽ
अस्व गल ऽ
त्वगत्वचा
शुक्र काम
रामः
वसाचर्बी

कठोर= द्व शु

स्वा ५

रश त्रिकोणाच्चतुरस्रसप्तमान्यवलोकयंतिचरणाभिवृद्धितः॥१॥रविजाभरेज्यरुधिराःपरेचपेक्ष
मशोभवंतिकिलवीक्षणोधिकाः॥१३॥अयनक्षणवासरर्त्तवोमासोर्द्धंचसमाश्चभास्करा
त्॥कटुकलवणतिक्तमिश्रितामधुराम्लौचकषायइत्यपि॥१४॥जीवोजीवबुधौशितेंदु
तनयौव्यर्काविभौमाःक्रमात्॥वींद्वर्काविकुजेंद्विनाश्चसुहृदःकेषांचिदेवंमतं॥सत्याके
सुहृदस्त्रिकोणभवनात्स्वात्त्यधीधर्मपाःस्वोच्चायुःसुखपाःस्वलक्षणविधेर्नान्येविरो
धादिति॥१५॥शत्रूमंदसितौसमश्चशशिजोमित्राणिशेषारवेस्तीक्ष्णांशुर्हिमरश्मिज
श्चसुहृदौशेषाःसमाःशीतगोः॥जीवेंदूष्णकराःकुजस्यसुहृदौज्ञोरिःसिताकीसमौमित्रे
सूर्यसितौबुधस्यहिमगुःशत्रुःसमाश्चापरे॥१६॥सूरेःसौम्यसितावरीरविसुतोमध्यो

परे त्वन्यथा सौम्यार्कीसुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी॥ शुक्रज्ञौ सुहृदौ समः सुरगु
रुः सौरस्य चान्ये रयो येऽभिप्रोक्ताः सुहृदस्त्रिकोणभवनात्तेभ्यो मया कीर्तिता॥७॥ अन्योन्यस्य ध
नेव्ययायपसहजव्यापारवंधुस्थितास्तत्काले सुहृदः स्वतुंगभवनेप्येके रपस्त्वन्यथा॥ द्व्यैका
नुक्रमपान्सुहृत्समरिपून्संचित्य नैसर्गिकांस्तत्काले तु पुनस्तु तानधिसुहृन्मित्रादि
भिः कल्पयेत्॥८॥ स्वोच्चसुहृत्स्वत्रिकोणनवांशैः स्थानवलं स्वगृहोपगतैश्च॥ दिक्षु
वुधांगिरसौ रविभौमौ सूर्यसुतः शशिनश्च केन्द्रे च॥९॥ उदगयने रविशीतमयूखौ
वक्रसमागमगाः परिशेषाः॥ विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परिकल्प्याः
॥१०॥ निशि शशिकुजसौराः सर्वदा ज्ञोऽह्नि चान्ये बहुलसितगताः स्युः क्रूरसौम्याः क्रमेण

ह्यमनदिनसः२ कु१ द्वादशांशः

६५न १

दिवसं सेरा मासपेः कालवीर्यं श्च गुरुचरा घाव द्धितो वीर्यवंतः॥२१॥इति श्री वरा

हमिहिरकृतौ वृहज्जातके ग्रहभेदो नाम द्वितीयोध्यायः॥२॥ क्रूरग्रहैः सुवलिभिर्विवलैश्च

सौम्यैः क्लीवे चतुष्टयगते तदवेक्षणाद्वा॥ चंद्रोपगद्विरसभागसमानरूपं सत्वं वदेद्यदि भ

वेत्स वियोनिसंज्ञः॥१॥पापा वलिनः स्वभागगाः पारक्ये विवलाश्च शोभनाः॥लग्नं च

वियोनिसंज्ञकं दृष्ट्वात्रापि वियोनिमादिशेत॥२॥क्रियः शिरो वक्त्रगले वृषोन्ये पादांस

के पृष्ठमुरोथ पार्श्वे॥कुक्षिस्त्वपानांघ्र्यथ मेढ्रमुष्कौ स्फिक्पुच्छमित्याह चतुष्पदांगे॥३॥

लग्नांशकाद्ग्रहयोगेक्षणाद्वा वर्णान्वदेद्वलयुक्ताद्वियोनौ॥दृष्ट्या समानान्प्र

वदेत्स्वसंख्यया [illegible] रेखां वदेत्स्मरसंस्थैश्च पृष्ठे॥४॥खगे दृकाणे वलसंयुते न वा ग्रहेयु

घ२

अंमु

पलवांशे

कु२

स्वनयांशः

पक्षादिष्कं

ग२

त१ अं॰गुदभाग१ अंघ्र॰चरण मेढ्र॰उपस्थ॰ मुष्क अंडकोश

स्फिक्॰कुलर॥

खेचरभांशकोदये॥बुधांशकेऽवाविहगाः स्थलांबुजाः शनैश्चरेंद्वीक्षणयोगसंभवाः॥५॥
होरेंदुसूरिरविभिर्विबलैस्तरूणां तोये स्थले तरुभवांशकृतप्रभेदः॥लग्नाद्ग्रहः स्थलज
लर्क्षपतिस्तु यावांस्तावंत एव तरवः स्थलतोयजाताः॥६॥अंतःसारान्जनयति रवि
र्दुर्भगान्सूर्यसूनुः क्षीरोपेतांस्तुहिनकिरणः कंटकाढ्यांश्च भौमः॥वागीशज्ञौ सफल
विफलान्पुष्पवृक्षांश्च शुक्रः स्निग्धानिंदुः कटुकविटपान्भूमिपुत्रश्च भूयः॥७॥शु
भोऽशुभर्क्षे रुचिरं कुभूमिजं करोति वृक्षं विपरीतमन्यथा॥परांशके यावति विच्युतः स्व
कोद्भवंति तुल्यास्तरवस्तथाविधाः॥८॥इति वियोनिजन्माध्यायस्तृतीयः॥३॥कुजें
दुहेतु प्रतिमासमार्तवं गते तु पीडर्क्षमनुष्णदीधितौ॥अतोऽन्यथास्थे शुभपुंग्र

मनुपचपस्पे१ हे१

नेर कोष्ठः२ शुभैर

स्नहे क्षितेनरेणसंजो ग मुपैति ॥ कामिनि ॥१॥ यथास्तराशिर्मिथुनं समेति
थैव वाच्यो मिथुनप्रयोगः ॥ असदृशं लोकितसंपु तेसरोषदेशैः सवीलाशहासैः
॥२॥ रवींदुशुक्रावनिजैः स्वभागगैः गुरौ त्रिकोणोदयसंस्थिते पिवाप्यभवत्यपत्यं हि
विजिनांमि मेकराशिमांशोर्विदधाति वा फलाः ॥३॥ दिवार्कशुक्रौ पितृमातृसंज्ञि
तौ शनैश्चरेंदू निशितद्विपर्ययात् ॥ पितृव्यमातृष्वसृसंज्ञितौ च तावजयौ युग्मसंग
योः शुभौ ॥४॥ दिवाकरेन्द्वोः स्मरगौ कुजार्कजौ पुंगवयोषितास्तदा ॥ व्य
यस्थगौ मृत्युकरौ पुतौ तथा तदेकदृष्ट्या मरणाय कल्पितौ ॥५॥ अभिलषभिरुदय

वीर्य

तोतर

एतर

मातृभगिनी

पुत्रकः स्त्रियां

गद्यसेर

म१

र.जा.

१

र्लैसम्हिर्मरणमेतिशुभदृष्टिमयाते॥उदयराशिसहितेचयमेस्त्रीविगलितोडुपतिभसु
तदृष्टे॥६॥पापद्वयमध्यसंस्थितौलग्नेंदुनचसौम्यवीक्षितौ॥युगपत्पृथगेव[illegible]वाचेदे
न्नारीगर्भयुताविपद्यते॥७॥क्रूरैःशशिनश्चतुर्थगैर्लग्नाद्वानिधनाश्रितेकुजे॥वंधां
ग४ त्यगयोःकुजार्कयोःक्षीणेंदौनिधनायपूर्वव्रत्॥८॥उदयास्तगयोःकुजार्कयोर्निधनंशस्त्र
कृतेवदेत्तदा॥मासाधिपतौनिपीडितेतत्कालेस्रवणंसमादिशेत्॥९॥शशांकलग्नोपग
तैःशुभग्रहैस्त्रिकोणजायार्थसुखास्पदस्थितैः॥तृतीयलाभर्क्षगतैश्चपापकैःसुखीतुग
र्भोरविणानिरीक्षितः॥१०॥ओजर्क्षेपुरुषांशकेषुबलिभिर्लग्नार्कगुर्विंदुभिःपुंजन्मप्र
वदेत्समांशकगतैर्युग्मेषुतैर्योषितः॥गुर्वर्कौविषमेनरंशशिसितौवक्रश्चयुग्मेस्त्रियंद्व्यंग॥

राम.

७

स्याद्बुधवीक्षणाच्च यमलं कुर्वंति पक्षे स्वके ॥ ११ ॥ विहाय लग्नं विषमर्क्षसंस्थः सौरोऽपि पुंजन्म
करो विलग्नात् । प्रोक्तग्रहाणामवलोक्य वीर्यं वाच्यप्रसूतौ पुरुषोंगना वा ॥ १२ ॥ अन्योन्यं य
दि पश्यतः शशिरवी यद्यार्किसौम्यौ तथा वक्रो वा समगं दिनेशमसमे चंद्रोदयौ चेत्स्थितौ ।
पुंभोजर्क्षगतावपीन्दुशशिजौ भूम्यात्मजेनेक्षितौ पुंभागे सितलग्नशीतकिरणाः षट्क्ली
वयोगाः स्मृताः ॥ १३ ॥ युग्मे चंद्रसितौ तथौजभवने स्युर्ज्ञारजीवोदयाः लग्नेंदू नृनिरीक्षि
तौ च समगौ युग्मेषु वा प्राणिनः । कुर्युस्ते मिथुनं ग्रहोदयगतान्द्व्यंगांशकान्पश्यति स्वां
शे ज्ञे त्रितयं ज्ञगांशकवशाद्युग्मं त्वमिश्रैः समं ॥ १४ ॥ धनुर्धरस्यांत्यगते विलग्ने ग्रहै
स्तदंशोपगतैर्बलिष्ठैः । बुधार्किणा वीर्ययुतेन दृष्टे संति प्रभूता अपि कोशसंस्थाः ॥ १५ ॥ म्ह

वृ॰जा॰

८

कललघनांकुरास्थिचर्म्मांगजचेतनयाःसितकुजजीवसूर्यचंद्रार्किबुधाःपरतः॥उदये
पचंन्द्रसूर्यनाथाःक्रमशोगदिताभवंतिशुभाशुभंचमासाधिपतेःसदृशं॥१६॥त्रिकोण
गेज्ञेविवलैस्तसापदेमुखांघ्रिहस्तैर्द्विगुणोस्तदाभवेत्॥अवाग्गवींदावसुभेभसंधि
गेःशुभेक्षितश्चकुरुतेगिरंचिरात्॥१७॥सौम्यर्क्षांशेरवीजरुधीरोचेक्षदंतोत्रजा
तःकुब्जःस्वर्क्षेशशिनितनुगेमंदमाहेयदृष्टे॥पंगुर्मीनेयमशशिकुजेवीक्ष्यतेलग्न
संस्थेसंधौपापैःशशिनिचजडःस्यान्नचेत्सौम्यदृष्टः॥१८॥सौरशशांकदिवाकरदृष्टे
क्र२ वामनकोमकरांत्यविलग्ने॥धीनवमोदयगैश्चदृकाणैःपापयुतैरभुजांघ्रिशिरास्यात्
१९॥रविशशियुतेसिंहेलग्नेकुजार्किनिरीक्षितेनयनरहितःसौम्यासौम्यैःसबुद्बुदलो

राम॰

८

चनः॥व्ययगृहगतःश्चंद्रोवामंदहिनत्यपरे॥विकलैश्चशुभगदितायोगावाप्याभवंतिशुभेक्षिताः

२०॥तत्कालमिंदुसहितोद्विरसांशकाद्यस्तत्तुल्यराशिसहितेपुरतःशशांके॥यावानुदेतिदि

नरात्रिसमानभागस्तावद्वदंतेदिननिशोःप्रवदंतिजन्म॥२१॥उदयतिमृदुभांशेसप्तमस्थेपि

मंदेयदिभवतिनिषेकःसूतिरब्दत्रयेण॥शशिनितुविधिरेषद्वादशाब्देप्रकुर्यान्निगदितमि

हचिंत्यंसूतिकालेचयुक्त्या॥२३॥इतिवाराहमिहिरकृतौबृहज्जातकेनिषेकाध्यायश्चतुर्थः ४ बे५

पितुर्जातःपरोक्षस्यलग्नमिंदावपश्यति॥विदेशस्थस्यचरभेमध्याद्भ्रष्टेदिवाकरे॥१॥उ

दयस्थेवापिमंदेकुजेवास्तंसमागते॥स्थितेवांतःक्षपानाथेशशांकसुतशुक्रयोः॥२॥शशांकेपा

पलग्नेवावृश्चिकेशत्रिभागगे॥शुभैःस्वायस्थितेर्जातःसर्पस्तद्वेष्टितोपिवा॥३॥चतुष्प

व॰जा॰

दगते भानौ शशि वीर्य्यसमन्विते ॥ द्वितनुस्थेऽब्जपमलौ भवनः केशवेष्टितौ ॥४॥ छागसिंगवृ
षे लग्ने तत्स्थसौरे यवाकुजे ॥ ॥ अंशसदृशगात्रे जायते नालवेष्टितः ॥५॥ न लग्नमिंदुं च गुरुर्नि
रीक्षते न वा शशांकं रविणा समागतं ॥ सपापकोऽर्केण युतोथवा शशी परेण जातं प्रवदंति नि
श्चयात ॥६॥ क्रूरर्क्षगतावशोभनौ सूर्यात्द्यूनन वात्मजस्थितौ ॥ वद्धस्तु पिता विदेशगं स्वेवा
राशिवशात्तथोपथि ॥७॥ पूर्णोशशी निस्वराशिगे सौम्यलग्नगते शुभे सुखे ॥ लग्ने जलगे
पि वा चंद्रे पोतगता प्रसूयते ॥८॥ आप्योदयमाप्यगः शशी संपूर्णः समवेक्षते थवा ॥ मेषूर
ग्ग वंधुलग्नगः स्यात्प्रसूतिः सलिलेन संशयः ॥९॥ उदयोडुपयोर्व्ययस्थिते गुप्तां पापनिरी
क्षिते यमे ॥ अलिकोर्क्षियुते विलग्ने सौरे शीतकरेक्षिते ऽवटे ॥१०॥ मंदे ऽच्चगते विलग्न

५१

रामः

त्रि
गेबुधसूर्येंदु निरीक्षिते च क्रमात्॥ क्रीडाभवने सुरालये जननं सोखरभेषु चादिशेत्॥११
नेलग्नगं प्रेक्ष्य कुजः श्मशाने रम्ये सितेंदू गुरुरग्निहोत्रे॥ रविर्नरेंद्रामर गोकुलेषु शिल्पाल
येत्तः प्रसवं करोति॥१२॥ राश्यंशमान गोचरे मार्गे जन्म चरे स्थिरे गेहे॥ स्वर्क्षांशगते स्व
मंदिरे बलयोगात्फलेंऽशकर्क्षयोः॥१३॥ आरार्कजयोस्त्रिकोणगे चन्द्रेस्ते ७ च विसृज्य
ते म्बपा॥ दृष्टे मरराज मंत्रिणा दीर्घायुः सुखवांश्च संस्मृताः॥१४॥ पापेक्षिते तुहिन
गावुदये कुजेस्ते त्यक्तो विनश्यति कुजार्कजयोस्तथाये॥ सौम्येपि पश्यति तथाविधहस्त
मेति सौम्यतरेषु परहस्तगतोप्यनायुः॥१५॥ पितृमातृगृहेषु तद्बलात्तरुशालादिषु नि
चगैः शुभैः॥ यदि नैकगतैस्तु वीक्षितो लग्नेंदू विजने प्रसूयते॥१६॥ मंदर्क्षांशे शशिनि

स्तु

जलचरस्थे

र.जा. हिबुके मंदद्दष्टेच्चे गेवा तद्युते वा तमस्ति शयनं नीचसंस्थे श्च भूमो॥ यद्वद्राशिं व्रजंति हरि

१० जं गर्भमोक्षश्च तद्वत्पापैश्चंद्रात्स्मरसुखगतैः क्लेशमाहुर्जनन्याः॥१७॥ लग्नेदूःशांशकाद्वै तैलः

र्द्यपाच्च वर्त्तिर्दीपोऽर्कपुत्रक्षवशाच्च राघः॥ द्वारं च तद्वास्तुनि केन्द्रसंस्थैः ज्ञेयं ... हैर्वीर्य

शांतिः समन्वितैर्वा॥१८॥ जीर्णं संस्कृतमर्कजे क्षितिसुते दग्धं नवं शीतगो काष्ठाढ्यं न दृ गरु

ढं रवौ शशिसुते तन्नैकशिल्प्युद्भवं॥ रम्यं चित्रयुतं नवं च भृगुजे जीवे दृढं मंदिरं च

श्र क्रस्यैर्यथोपदेशं रचनां सामंतप्रवांवदेत्॥१९॥ मेषकुलीरतुलालिघटैः प्रागु

त्तरतो गुरुसौम्यगृहेषु॥ पश्चिमतश्च वृषेण निशासो दक्षिणभागकरो मृगसिंहो राम.

॥२०॥ प्राच्यादिगृहे क्रियादयो द्वौ द्वौ कोणगता द्विमूर्त्तयः॥ शय्यास्वपि वास्तुवद्वदे १०

दशभावः

त्यादैवं षड्भिर्नवोत्थसंस्थितैः ॥२१॥ चन्द्रलग्नांतरगतैर्ग्रहैः स्युरूपस्तनिकाः ॥ वहिरन्
श्च चक्रार्द्धे दृश्यादृश्येन्यथा परे ॥२२॥ लग्ननवांशपतुल्यतनुः स्याद्वीर्ययुतग्रहतुल्यतनुर्वा
॥ चन्द्रसमेतनवांशपवर्णः कादिविलग्नविभक्तभगात्रः ॥२३॥ कं दृक्श्रोत्रनसाकपो
लहनवो वक्त्रं च होरादयस्ते कंठांशकबाहुपार्श्वहृदयक्रोडानि नाभिस्ततः ॥ वस्तिःशि
श्नगुदे ततश्च वृषणावूरू ततो जानुनी जंघांघ्रीत्युभयत्र वाममुदितैर्द्रेष्काणभागैस्त्रि
धा ॥२४॥ तस्मिन्पापयुते व्रणं शुभयुते दृष्टे च लक्ष्मादिशेत्स्वक्षांशे स्थिरसंयुतेषु सहजः
स्यादन्यथागंतुकः ॥ मंदेश्मानिलजोग्निशस्त्रविषजो भौमे बुधे भूभवः सूर्ये काष्ठच
तुष्पदेन हिमगौ शृंग्यब्जजोन्यैः शुभम् ॥२५॥ समनुपतिता यस्मिन्भागे त्रयः सबुधा ग्रहाः

पाषाण २

पृथ्वीसे २

चंद्र १ शृंगयान जलचर १ वायु २

ग्य १ चतुष्पदकाष्ठरवि

वृ.जा.
११

शुभे

भवति नियमात्तस्या वा पितुः श्व शुभेषु वा॥ व्रणकृदशुभं षष्ठो लग्नात्तनोर्भसमाश्रिते ति
लकमषकृद्दृष्टः सौम्यैर्युतश्च सलक्ष्मवान्॥२४॥ इति श्रीवराहमिहिरकृतौ वृहज्जातके
जन्मविधिर्नाम पंचमोध्यायः॥५॥ संध्यायां हिमदीधितिहोरापापैर्भांतगतैर्निधनाय॥ प्रत्ये यां२
कंशशिपापसमेतैः केंद्रैर्वा स विनाशमुपैति॥१॥ चक्रस्य पूर्वापरभागगेषु क्रूरेषु सौम्येषु
च कीटलग्ने॥ क्षिप्रं विनाशं समुपैति जातः पापैर्विलग्नास्तमयाभितश्च॥२॥ पापावुदया ७५
स्तगतौ क्रूरेण युतश्च शशी॥ दृष्टस्तु शुभैर्न यदा मृत्युश्च भवेदचिरात्॥३॥ क्षीणे हिमगौ व्य २
यगैः पापैरुदयाष्टमगैः॥ केंद्रेषु शुभाश्च न चेत्क्षिप्रं निधनं प्रदेत्॥४॥ क्रूर[illegible]संयुतः शा व२ राम:
शी स्मरान्त्यलग्नमृत्युगः॥ कंटकाद्बहिः शुभैरवीक्षितश्च मृत्युदः॥५॥ शशिन्य रिविनो ११

स्ना २

धा० १ गे निधनमाशुपापेक्षितेशुभैरथ समाष्टकं दलमतश्च मिश्रैः स्थितिः ॥ असद्भिरवलोकि
ते लिभिरत्रमासं शुभे कलत्रसहिते च पापविजिते विलग्नाधिपे ॥ ६ ॥ लग्ने क्षीणे श
१२ शिनि निधनरंध्रकेन्द्रेषु पापैः पापांतस्थे हिबुकनिधनयुक्ते च चंद्रे ॥ एवं लग्ने भव
ति मदनछिद्रसंस्थैश्च पापैर्मात्रा सार्द्धं यदि न च शुभैर्वीक्षितः शक्तिमद्भिः ॥ ७ ॥ राशस्य
न गे सद्भिरवीक्षमाणे चंद्रे त्रिकोणोपगतैश्च पापैः ॥ प्राणैः प्रयात्याशु शिशुर्वियोगम
स्ते च पापैस्तु हिनांशुलग्ने ॥ ८ ॥ अशुभसहिते ग्रस्ते चंद्रे कुजे निधनाश्रिते जननिसुतयो
र्मृत्युर्लग्ने रवौ तु स शस्त्रजः ॥ उदयपतिरवौ शीतांशौ वा त्रिकोणविनाशगे निधनमशुभै
र्वीर्योपेतैः शुभैरपुतेक्षिते ॥ ९ ॥ असितरविशशांकभूमिजैर्व्ययनवमोदयनैधनाश्रि

तैः॥ भवति मरणमाशु देहिनां यदि वलिना गुरुणा न वीक्षितः॥१०॥ सुत मदन नवांत्यलग्न
रंध्रेष्वशुभयुतो मरणाय शीतरश्मिः॥ भृगुसुत शशि पुत्र देवपूज्यैर्यदि वलिभिर्न युतोऽव
लोकितो वा॥११॥ योगे स्थानं गतवति वलिनि श्चंद्रे स्वं वा तनुगृहमथवा॥ पापैर्दृष्टे वल
वति मरणं वर्षस्यांतः किल मुनिगदितं॥१२॥ इति वाराहमिहरकृतौ वृहज्जातके सूपो
मरणाध्यायः॥ ॥ मयपवनमणित्थशक्तिपूर्वैर्दिवसकरादिषु वत्सराः प्रदिष्टाः॥ नव
तिथिविषयाश्विभूतरुद्रदशसहितादशभिः स्वतुंगभेषु॥१॥ नीचेतोर्द्धं ह्रसति हि ततश्चा
न्तरस्थेनुपातो होरा त्वंशप्रतिमपरे राशितुल्यं वदंति॥ हित्वा वक्रं रिपुगृहगतैर्हीयते
स्वत्रिभागः सूर्योच्छिन्नद्युतिषु च दलं प्रोह्य शुक्रार्कपुत्रौ॥२॥ सर्वार्द्धत्रिचरणपंचषष्ठ

तुंगग्रहेद्वशसहिता

१२।११।१०।८।८

भागाः क्षीयन्ते व्ययभवनादसत्सु वामं॥ सत्स्वर्द्धं ह्रसति तथैकराशिगानामेकोंशं हरति व
सर्वक लाउ लीतथाह सत्यः॥३॥ सोद्धृदितोदितनवांशहतात्समस्ताभागोष्टयुक्तशतसंख्यउपैति
नाशं॥ क्रूरे विलग्नसहिते विधिनात्व नेन सौम्येक्षिते दलमतः प्रलयं प्रयाति॥४॥ स
कएिला माः षष्टिर्द्विघ्नामनुजकरिणां पंच च निशाहयानां द्वात्रिंशत्खरकरभयोः पंचकं कृतिः॥ वि
पंचनि रूपाप्यायुर्वर्षं महिषपोर्द्वादशशुनः स्मृतं छागादीनां दशकसहिताः षट् च परमं॥
रग१२० ५॥ अनिमिषपरमांशके विलग्ने शशितनये गवि पंचवर्गलिप्ते॥ भवति परमायुषः प्र
१२·मनु माणं यदि सहितास्सकलाः स्वतुंगभेषु॥६॥ आयुर्दायं विष्णुगुप्तोपि चैवं देवस्वामी सिद्धसे
जे। नश्च चक्रे॥ दोषश्चैषां जायते द्वाविंशद्धित्वा नोयुर्विंशतेः स्यादधस्तात्॥७॥ यस्मिन्

१२॰सप्तमासर्वगृह
परमा॰ १

हो॰जा॰ न्योगेपूर्णामायुं प्रदिष्टं तस्मिन्प्रोक्तं चक्रवर्तित्वमन्यैः॥ प्रत्यक्षोपंतेषुदोषोपरोपि जीवेत्या
१२ पुः पूर्णामर्थे विनापि॥ ८॥ स्वमतेन किलाह जीवशर्मा ग्रहदायं परमायुषः स्वराशिं॥ गतह
भुक्तनवांशराशितुल्यं वहुसाम्यं समुपैति सत्यवाक्यं॥ ९॥ सत्योक्ते ग्रहमिष्टं लिप्तीकृत्वा
शतद्वयेनाप्तं॥ मंडलं भागविशुद्धाः स्युः शेषात्तुमाशाद्याः॥ १०॥ स्वतुंगवक्रोपगतैस्त्रिसं
गुणं द्विरुक्तं मत्स्वांशकं त्रिभागगेः॥ द्रूपान्विशेषस्तु भदंतभाषितेसमानमन्यत्प्रथमे
न४ युदीरितं॥ ११॥ किंत्वत्र भांशप्रतिमं ददाति वीर्यान्विता राशिसमं च होरा॥ क्रूरोदये चो
पचयः स नात्र कार्यं च नार्द्धः प्रथमोपदिष्टः॥ १२॥ गुरुशशीसहिते कुलीरलग्ने शशी राम॰
तनये भृगुजे च केन्द्रयाते॥ भवरिपुसहजोपगैश्च शेषैरमितमिहायुरनुक्रमाद्विनास्या १२
सत्योपदेशो वरमत्र किंतु कुर्वन्त्ययोग्यं बहुवर्गनाभिः॥ आचार्यकत्वं च बहु
घ्नतायामेकं तु यद्भूरि तदेव कार्यं॥ १३॥

प्रावल्येर

२४

स्यात्॥४॥इतिवराहमिहरकृतौवृहज्जातकेआयुर्द्दायाध्यायः॥सप्तमः॥७॥उदयरविशशांकप्रा
णिकेन्द्रादिसंस्थाःप्रथमवयसिमध्येंत्येचदद्युःफलानि॥नहिनफलविपाकःकेंन्द्रसंस्थाद्य
भावेभवतिहिफलपंक्तिःपूर्वमापोक्लिमेपि॥१॥आयुःकृतंयेनहियत्तदेवकल्प्यादशासा
प्रवलस्यपूर्वा॥सौम्येवहूनांवहुवर्षदस्यतेषांचसाम्येप्रथमोदितस्य॥२॥एकर्क्षगोर्द्धमपहृ
त्यददातितुस्वंत्र्यंशंत्रिकोणगृहगःस्मरगःस्वरांशं॥पादंफलस्यचतुरस्रगतःसहोरास्त्वेवं
परस्परगताःपरिपाचयंति॥३॥स्थानान्यथैतानिसवर्णयित्वासर्वाण्यधश्छेदविवर्जितानि
॥दशाहतपिंडेगुणकंयथांशश्छेदस्तदैक्येनदशाप्रभेदाः॥४॥सम्यग्बलिनःस्वतुंगभागेसंपू
र्णावलवार्जितस्यरिक्ता॥नीचांशगतस्यशत्रुभागेज्ञेयानिष्फलादशाप्रसूतौ॥५॥श्री

भ्रष्टस्य तुंगादवरोहिसंज्ञा मध्या भवेत्सा सुहृदुच्चभागे। आरोहिणी निम्नपरिच्युतस्य नीचारि
भांशेष्वधमा भवेत्सा॥६॥ नीचारिभांशे समवस्थितस्य शस्ता गृहे मित्रफला प्रदिष्टा। संज्ञा
नुरूपाणि फलान्यथैषां दशासु वक्ष्यामि यथोपयोगं॥७॥ उभयेऽधममध्यपूजिता द्रेष्काणै
श्चरभेषु चोत्क्रमात्॥ अशुभेष्टसमाः स्थिरे क्रमाद्धोरायाः परिकल्पिता दशा॥८॥ एकं द्वौ
नव विंशतिर्धृतिकृती पंचाशदेषां क्रमाच्चन्द्रारेंदुजशुक्रजीवदिनकृद्दैवाकरीणां समाः
स्वैः स्वैः पुष्टफलानि सर्गकथितैः पक्तिर्दशायां क्रमाद्दत्ते लग्नदशाशुभेति यवनानेच्छंति के
चित्तथा॥९॥ पाकस्वामिनि लग्नगे सुहृदि वा वर्गेऽस्य सौम्येऽपि वा प्रारब्धा शुभदा दशा त्रिषद
शायदूलाभेषु वा पाकपे॥ मित्रोच्चोपचयः त्रिकोण मदने पाकेस्वरः स्थितश्चंद्रः सत्फल

१।८८।२।४।८।२।१०।८।६।७।मंगल।१।११।४।८।२।१०।८।६।७ शनि।७।११।२।६। भुक्राथजीवा ८।५।८।११।६।१०।३। चंद्र
२।१०।९।५ वु।१।२।४।८।२।१०।३।११।६।४। लग्न।६।३।१०।११।२।५।१२। चं।

शुभफलदशायां तादृगेवांतरात्मा वहुजनपतिपुंसां सौख्यमर्थागमंच॥ कथितफलविपाकैस्तर्कयेद्वर्तमानां परिणमति फलोक्तिः स्वप्नचिंतासुवीर्यैः॥२०॥ एकग्रहस्य शदृशे फलयोर्विरोधे नाशंवदेद्यदधिकंपरिपच्यमेतत॥ नान्योग्रहः शदृशमन्यफलंहिनस्तिस्वां स्वांदशामुपगताः स्वफलप्रदास्युः॥२१॥ इति श्रीवराहमिहराचार्यविरचिते वृहज्जातके दशायोष्टमोध्यायः॥८॥ स्वादर्कः प्रथमायवंधुनिधनद्व्याज्ञातपोद्यूनगो वक्रात्तद्वदिवंतद्वदेव रविजान्भुक्रौ स्मरांत्यायगः॥ जीवाद्धर्मसुतायशत्रुषुदशत्र्यायारिगः शीतगोरेष्वेवांत्यतपःसुतेषु च वुधाल्लग्नात्सवंध्वंत्यगः॥१॥ लग्नात्षट्त्रिदशायगः सधनधीधर्मेषु चाराच्छशी स्वात्सास्तादिषु साष्टस सदासुखेः षट्त्र्यायधीस्थोयमात्॥ धीत्र्या

१।११।४।८।२। २।९।७ भू
फो१

७।२।८।०।३।४।६।३।११।५।२ रवि ५

स्वर्यातर   १२।११।८।केद्रूश्च।उ

ह॰जा॰ ८

पौर्षभकं८केषुशशीज्ज्ञाज्जीवाघ्रैपापाषगः केन्द्रस्यश्च सितातु धर्मे सुखधीत्र्यो पास्पदा
नंगगः॥२॥ वक्रस्त्र पैंचे पोष्ठिंनो स्ततै नपेष्याघोधिकेषद्रपाच्चंद्रादिग्विर्फलेषुकेन्द्रनिधं
नशापैथेगः स्यात्सुभः॥ धर्म्मोपार्षभकेन्द्रगोर्कतनपात् तात्थे८त्रि।धीलेभगः सुत्रा

उपचय

तृषट्व्यपेलोभमत्सुषुगुरोः कर्म्मात्पेलोभारिषु॥३॥ब्योद्यापौषैतपः सुखेषुभगुजा२   उक्त श्लो॰१०-७
त्सत्र्योत्मजेष्विंदुजः सातात्तेषुपमारुयोर्म्यपूरिपुप्रात्स्यषगोवाक्पतेः॥ धर्मोपोरिसुतेव्य   उक्त॰
येषुसवितुः स्यात्साधकर्म्मत्रिगः षट्स्थोपाषसुखोस्पदेषुहिमगोः साधेषुलग्नात्तुभः॥
४॥ दिकूस्थोपार्षभदोपवंधुषुकुजात्स्वात्सत्रिकेषंगिराः सूर्यासित्रिनवेषुधीस्थेनवेदि   राम
गैलाभोरिगोभार्गवात्॥ जोपा पार्थेनवात्मजेषुहिमगोः मंदात्त्रिषडेधीव्ययोदग्धीये   १७

द्व्यायेसुखेवायेपेष्टेधेनवगो ज्ञात् सप्तमेरश्मोदयात् ॥५॥ लग्नोदास्तुतलोभरंध्रनवगः स्वांत्ये:
शशांकात्रिपतः स्वोत्साहेषु स्वत्रिधीनवदशैंछिद्रप्रिगे: सूजेजात् ॥ रंध्राप्येव्ययेषो
रवेर्नवदशं प्रोपेष्टेधीस्त्योगुरोज्ञाद्व्यायेपनवारिगोह्नि नवषष्ठ पंचांगमांत्ये: कुजात् ॥६॥
मंद: स्वात्रिसुतोपप्रिशत्रुषुशुभ: सारात्त्यगोभृमिजात् केन्द्रायाषधेनेष्विनादुपचपेष्वा
घेसुखेचोदयात् ॥ धर्मायोरिदशांत्यमत्तुषुवुधाच्चन्द्रात्रिषष्ठलोभेगः षष्ठायोन्त्यगतःसि
तात्सुरगुरो: प्रांप्सत्यधीशत्रुगः ॥७॥ इति निगदितमिष्टं नेष्टमन्यद्विशेषादधिकफलविपा
कंजन्मभात्तत्रदधु: ॥ उपचयगृहमित्रस्वोच्चगै: पुष्टमिष्टंत्वपचयगृहनीचारातिगैर्नै
ष्टसंपत् ॥८॥ इतिश्रीवराहमिहराचार्यकृते बृहज्जातके अष्टकवर्गो नवमोध्यायः ॥९॥ अथा

अष्टकवर्गरेखाफल: कष्टंस्यादेकरेखायां द्वाभ्यामर्थक्षयो भवेत् त्रिभि: क्लेशं विजा
नीयाच्चतुर्भि: समता मता पंचभि: परमं सौख्यं षड्भिरर्थागमो भवेत् सप्तभि: परमं सौ
ख्यं अष्टाभि: सर्वसंपद

श्रिः१

व॰जा॰ पितृपत्निःशत्रुमित्रभ्रातृस्त्रीभृतकजनाद्दिवाकराद्यैः॥ होरेंद्वोर्दशमगतैर्विकल्पनीया भें तृन
चंन्द्र १८ द्वर्कास्पदपतिगांशनाथवृत्त्या॥१॥ अर्कांशे तृणकनकोर्णभेषजाद्यैश्चंद्रांशे कृषिजल तृनकनक२
जांगनाश्रयाच्च॥ धात्वग्निप्रहरणसाहसैः कुजांशे सौम्यांशे लिपिगणितादिकाव्यशिल्पैः
॥२॥ जीवांशे द्विजविबुधाकरादिधर्मैः शुक्रांशे मणिरजतादिगोमहिष्यैः॥ सौरांशे श्र
मवधभारनीचशिल्पैः कर्मेशाध्युषितनवांशकर्मसिद्धिः॥३॥ मित्रारिस्वगृहगतैर्ग्रहैस्ततस्त
तोर्थोस्तुंगस्थे बलिनि च भास्करे स्ववीर्यात्॥ आयस्थैरुदयधनाश्रितैश्च सौम्यैः संचिंत्यंब
लसहितैरनेकधास्वं॥४॥ इति वराहमिहिरकृतौ बृहज्जातके कर्माजीवो दशमोध्यायः राम॰
१०॥ प्राहुर्यवनाः स्वतुंगगैः क्रूरैः क्रूरमतिर्महीपतिः॥ क्रूरैस्तु न जीवशर्मणः पक्षे क्षितिपधि १८

पः प्रजायते॥१॥वक्रार्कजार्कगुरुभिः सकलैस्त्रिभिश्चस्वोच्चेषुषोडशनृपाःकथितैकलग्ने॥भि
काश्रितेषुचतथैकतमेविलग्नेस्वक्षेत्रगेशशिनिषोडशभूमिपास्युः॥२॥वर्गोत्तमगतेलग्ने
चंद्रेवाचंद्रवर्जितैः॥चतुराद्यैर्ग्रहैर्दृष्टैर्नृपाद्वाविंशतिस्मृताः॥३॥यमेकुंभेऽर्केऽजगविशशि
नितैरेवतनुगेनृपकुसिंहालिस्थैःशशिजगुरुवक्रैर्नृपतयः॥यमेन्दुतुंगेगेसवितृशशीजौ
घटभुवनेतुलाजेंदुक्षेत्रैःससितकुजजीवैश्चनरपो॥४॥कुजेतुंगेऽर्केन्द्वोर्धनुषियम
लग्नेचनृपतिःपतिर्भर्मेश्चान्यःक्षितिसुतविलग्नेसशशिनि॥सचंद्रेसौरेस्तेसुरपतिगुरो
चापधरगेस्वतुंगस्थेभानावुदयमुपयातेक्षितिपतिः॥५॥वृषेसेंदौलग्नेसवितृगुरुतीक्ष्णांशु
सुतनयैःसुहृज्जायाखस्थैर्भवतिनियमान्नानवपतिः॥६॥हयेसेन्दौजीवेमृगमुखगतेभू
मजेमंदेलग्नेसहजरिपुधर्मव्ययगतैःशशांकाद्यैर्ख्यातःपृथुगुणयशाः॥पुंगवपतिः॥

वृ.जा.
१९

मितनयेस्वतुंगस्थोलग्नेभृगुजशशिजावत्रनृपती॥सुतस्थोवक्रार्कौगुरुशशिसिताश्चापिहि
वुकेवुधेकन्यालग्नेभवतिहिनृपोन्योपिवलवान्॥७॥भृसेसेंहौलग्नेघटमृगमृगेंदूसुसहिते
र्यमाराख्यौपौभृत्सखलुमनुजःशास्तिवसुधां॥अजेसारेभूनौशशिगृहगतेचाम्रगुरौसु
रेज्येवालग्नेधरणिपतिरन्योपिगुणवान्॥८॥कर्किणिलग्नेतत्स्थेजीवेचेंद्रसितज्ञैरायप्रा
प्तैः॥मेषगतेर्केजातंविद्याद्विक्रमयुक्तंपृथ्वीनाथं॥९॥मृगमुखेर्केतनपस्तनुसंस्थःकिपकु
लीरपोधिपयुक्तः॥मिथुनतोलिसहितोवुधभुक्तोयदिततःपृथुयशाःपृथ्वीश्वरः॥१०॥स्वो
च्चेसंस्थेवुधेलग्नेभृगोमेषूरणाश्रिते॥सजीवेनिशानाथेराजामंदारयोःसुते॥११॥प्रपि
खलुकुलेजातामानवाराज्यभा[illegible]ःकिमुतनृपकुलोत्याप्रोक्तभूपालयोगः॥नृपतिकु

राम.
१९

लेर

कुलगु समुत्थाः पार्थिवा वक्ष्यमाणो भवति नृपतितुल्यस्तेषु भूपालजोऽपि ॥१२॥ उच्चस्वत्रिको
णगैर्बलस्थैस्त्र्याद्यैर्भूपतिवंशजा नरेंद्राः ॥ पंचादिभिरन्यवंशजा तहीनैर्वित्तयुता न भूमिपालाः
॥१३॥ लेखास्थे कुजेंदौ लग्ने भौमे स्वोच्चे कुंभे मंदे ॥ चापप्राप्ते जीवे राज्ञः पुत्रं विद्याद्भूमिनाथं ॥
१४॥ स्वर्क्षे भृगुजे पातालस्थे धर्मस्थाने प्राप्ते चन्द्रे ॥ दुश्चिक्यां गप्राप्ति प्राप्तेः शेषैर्जातः स्वामी भू
मेः ॥१५॥ सौम्ये वीर्ये युते तनुयुक्ते वीर्याढ्ये च शुभे सुखयाते ॥ धर्मार्थोपचयेष्वपशेषैर्धर्मा
त्मा नृपजः पृथ्वीशः ॥१६॥ वयोदये मूर्ति धनायलाभगैः शशांकजीवार्कसुतापरैर्नृपः ॥ सु
खे गुरौ खे शशितीक्ष्णदीधितौ यमोदये लाभगतैर्नृपो परैः ॥१७॥ मेषूरणापतनुगाः शशी मंद
जीवा ज्ञारौ धने सितरवी हिबुके नरेंद्रः ॥ वक्रासितौ शशिसुरेज्यसितार्कसौम्या होरासुखास्त

लागन्

वृ॰जा॰ शुभखचापिगताः प्रजेशाः॥१८॥ कर्मलग्नयुतपाकदशायां राज्यलब्धिरथवा प्रवलस्य॥ शत्रुनीच
गृहयातदशायां छिद्रसंश्रयदशाः परिकल्प्याः॥१९॥ नीचारिगृहसंस्थस्य दशायां प्रवलस्य च च्युति
२० र्वलविहीनस्य तन्नोक्तः परसंश्रयात्॥२०॥ गुरुसितबुधलग्ने सप्तमस्थेर्कपुत्रे वियति दिवसना
थे भोगिनां जन्म विंद्यात्॥ शुभवलयुतकेन्द्रैः क्रूरभस्थैश्च पापैर्व्रजति सचरदस्युः स्वामितामर्थ
र्थभाक्च॥२१॥ इति वराहमिहराचार्यविरचिते वृहज्जातके राजयोगाध्याय एकादशः॥ नवदिग्व
सवस्त्रिकाग्निवेदैर्गुणिता द्वित्रिचतुर्विकल्पजास्युः॥ यवनैस्त्रिगुणा हि षट् शती सा कथिता
विस्तरतोत्र तत्समासः॥१॥ रज्जुर्मुशलं नलश्च राशेः सत्यस्त्वाश्रयजान् जगाद योगान्॥ के
न्द्रैः सदसद्युतैर्दलाख्यौ स्रक्सार्पौ कथितौ पराशरेण॥२॥ योगाव्रजं त्वाश्रयजाः समत्वं पया एम॰
२०

आ॰ १५।२।४
१७।७।१०।१०।१२

द्वितियभवनात्
द्वितियचतुर्था
इत्यादि

वाञ्चवज्रांडलगोलकाद्यैः॥ केन्द्रोपगप्रोक्तफलोदलाख्या वित्याहुरन्येन पृथक्फलोनो॥३॥
आशान्नकेन्द्रभवनद्वयगैर्गदाख्यस्तन्वस्तगेषु शकटं विहगः खवध्वो॥४॥ शृंगाटकं नवमपंच
मलग्नसंस्थे लग्नान्यगैर्हलमिति प्रवदंति तज्ज्ञाः॥ शकटांडजवत्सुभाःसु भैर्वज्रसंज्ञविपरीतगैर्य
वः॥ कमलं च विमिश्रसंस्थितैर्वापी तद्यदि केन्द्रबाह्यतः॥५॥ पूर्वशास्त्रानुसारेण मया वज्रा
दयः कृताः॥ चतुर्थे भवने सूर्याद्ज्ञसितौ भवतः कथं॥६॥ कंटकादिप्रवृत्तेश्च चतुर्गृहगतै
र्ग्रहैः॥ यूपेषुशक्तिदंडाख्या होराद्यैः कंटकैः क्रमात्॥७॥ नौकूटछत्रचापानि तद्वत्सप्तर्क्षसं
स्थितैः॥ अर्द्धचंद्रस्तु नावाद्यैः प्रोक्तस्त्वन्यर्क्षसंस्थितैः॥८॥ एकांतरगतैरर्थात्समुद्रः षड्गृहा
श्रितैः॥ विलग्नादिस्थितैश्चक्रमित्याकृतिजसंग्रहः॥९॥ संख्यायोगाः सप्तसप्तर्क्षसंस्थे

लग्नात्एकां
तरगतैसप्तग्र
है तस्यचक्रसं
ज्ञो

२।६।१०।१०।७।भु
१।४।अ

रु.जा.
२१

रेकायायाद्वल्लकिदामिपाशः॥केदाराःस्यात्स्थलयोगोयुगंचगोलश्चान्यान्पूर्वमुक्तान्वि
हाय॥१०॥ईर्ष्युर्विदेशानिरतोध्वरूचिश्चरज्वांमानीधनीचमुशालेवहुकृत्यशांते॥व्यंगः
स्थिराङ्गनिपुणोनलज्जःस्वगुप्त्योभोगान्वितोभुजगजोवहुदुःखभाक्स्यात्॥११॥आश्रयो
क्तास्तुविफलाभवंत्यन्येविमिश्रिताः॥मिश्राःपेलफलंदधुरमिश्राःस्वफलप्रदाः॥१२॥(
जजार्थभाक्सततमर्थरूचीर्गदायांतद्धृत्तिभक्सकोऽजःसरुजःकुदारः॥द्रूताटनःकाल
हकृद्विलोप्रदिष्टःश्रृंगाटकेचिरसुखीकृषीकृद्धलाख्ये॥१३॥वज्रेंत्यपूर्वसुखितःशुभगोति
शूरःवीर्यान्वितोप्यथयवेसुखितौवयोंत्ये॥विख्यातकीर्त्यमितसौख्यगुणाश्चपद्मेवाप्यांत
नुस्थिरसुखिर्निधिकृन्नदाता॥१४॥त्यागीन्मवान्क्रतुवरैर्यजतेचयूपेहिंस्रोथगुप्त्यधिकृतः

भ्रमसीलः

राम
२१

कारागृहस्वामि

शरकृच्छ्रारव्ये॥ नीचो लसः सुखधनै विपुतश्च शक्तो दंडे प्रिये विरहितः पुरुषोंत्यवृत्तिः॥
१५॥ कीर्त्या पुतश्चलसुखः कृपराश्च नीजः कूटेन तप्रचरवंधनपश्च जातः॥ ६ त्रो भवः
स्वजनसौख्यकरोन्यसौख्यः शूरस्तुकार्मुकभवः प्रथमांत्यसौख्यः॥ १६॥ अर्हेनुजः सुभ
गकांतवपुः प्रधानस्तोपालयेनरपतिप्रतिमस्तुभोगी॥ चक्रेनरेन्द्रमुकुटद्युतिरंजितां
ह्रि वीर्योभवश्च निपुणः प्रिपगीतनृत्यः॥ १७॥ दानान्यकार्यनिरतः प्रभु पश्च हाम्ति पाशे
धनार्पनविशीलसुभृत्यवंधुः॥ केदारजः कृषिकरः स्ववेहृपयोग्यः शूरः स्वतो वधहृच्चिर्वि
धनश्च शूले॥ १८॥ धनविरहितः पाखंडी वा पुगेत्वथ गोलके विधनमलिना ज्ञानापेतः
कुशिल्पिलसोटनः॥ इति निगदितयोगाः सार्द्धं फलेरिह नाभसा निपतफलदाश्चिंत्या

सुशीलः

कुत्सितका
रीगर्हिकर्म
१

धूर्तः४।१३पर
कमी॥

वहुजनरूप
पोगि३

नमरशिल:

वृ.जा.
२२

घेतेसममत्तदशास्वपि॥१८॥इतिवराहमिहराचार्यविरचितेवृहज्जातकेनाभसंयोगाध्यायेद्वा
दशः॥१२॥अधमसमवरीष्ठान्यर्ककेन्द्रादिसंस्थेशशिनिविनयवित्तज्ञानधीनैपुणानि
अहनिनिशिचचंद्रेस्वधिमित्रांशकेवासुरगुरुसितदृष्टेवित्तवान्स्यात्सुखीच॥१॥सौम्यै
स्मरारिनिधनेष्वधियोगइंदोस्तस्मिंश्चमूप[illegible]सचिवक्षितिपालजन्मा॥संपन्नसौ
ख्यवि[illegible]भवाहतशात्रवश्चदीर्घायुषोविगतरोगभयाश्चजाताः॥२॥हित्वार्कंसुनफा
नफादुरुधराःस्वांत्योभयस्थैग्रहैःशीतांशोःकथितोन्यथातुबहुभिःकेमद्रुमोन्येत्त्व
सौकेन्द्रेशीतकरेथवाग्रहयुतेकेमद्रुमोनेष्यतेकेचित्केन्द्रनवांशकेषुचवदंत्युक्तिःप्रसि
द्धानते॥३॥त्रिंशत्सरूपासुनफानफायांषष्टित्रयंदौरुधुरप्रभेदाः॥पवैशापवेश

चंद्रात्सौम्ये
७।६।८।नग
अधियोगाः

राम.
२२

भार्यं विनास्त्वंप्रवदंति

गतेन पुत्रं स्थानं विनार्त्यप्रवदंति संख्ये॥ इच्छाविकल्पैः क्रमशोभिनीयानीते निवृत्तिः पुनर
न्यनीतिः॥४॥ स्वयमधिगतः वित्तः पार्थिवस्तत्समो वा भवति हि सुनफायां धीधनख्यातिमां
श्च॥ प्रभुरगदशरीरः शीलवान् ख्यातकीर्त्ति विषयसुखसुवेषो निर्वृतं श्चानफायां॥५॥ उ
त्पन्नभोगसुखभुग्धनवाहनाढ्यस्त्यागान्वितो दुरुधुराप्रभवः सुमत्या॥ केमद्रुमे मलिन
दुःखितनीचनीत्याः प्रेष्याः खलाश्च नृपतेरपि वंशजाताः॥६॥ उत्साहशौर्यधनसाह
सवान्महीजः सौम्यः पटुः सुवचनो निपुणः कलासु॥ जीवोर्थधर्मसुखवान्नृपपूजि
तश्च कामि भृगुर्बहुधनो विषयोपभोक्ता॥७॥ परविभवपरिच्छदोपभोक्ता रवितनयो
बहुकार्यकृद्गणेशः॥ अशुभकृदुडुपोन्हि दृश्यमूर्त्तिर्गलिततनुश्च शुभोन्यथान्यदूह्यं॥८

परिराक

दरिद्री

प्राप्तद्रव्य

रोगरहित शरीरः

उत्पन्नः

त्यागी

गलिततनु नाम क्षीणचंद्रः अदृश्यार्द्धे
तत्र शुभफलं स्यात् अन्यथा अन्यत ऊह्यं एतत् विपरीतं॥

पूर्णचंद्रः अष्टौअन्यस्थाने चंद्रः अशुभफलंभवति चंद्रकुजस्य प्रथमएतत्उत्पन्नद्रव्य

व॰ जा॰

लग्नाद्दतीववसुमान्वभुमोर्शशोकात्सोम्यगृहे रूपचपोपगतैः समस्तैः॥ द्युम्यांसमोल्प

२२ वभुमांश्चतहूनतापामन्येषुसत्स्वपिफलेष्विदमुक्तटेन॥ इतिवराहमिहिराचार्यविरचि

तेवृहज्जातकेश्चंद्रयोगाध्यायस्त्रयोदशः॥१३॥ तिग्मांशुर्जनयत्युषेशसहितोयंत्रा

श्मकारंनरंभौमेनाघरतंबुधेननिपुणंधीकीर्तिसौख्यान्वितं॥ क्रूरंवाक्पतिनान्यकार्य

निरतंशुक्रेणरंगायुधेर्लब्धस्वंरविजेनधातुकुशलंभांडप्रकारेषुच॥१॥ कूटज्ञोसवकुं

अन्येषुना भपरणपमशिवंमातुःसवक्रःशशीसज्ञः प्रश्रितमर्थवाक्यनिपुणंसौभाग्यकीर्त्यान्वितंश स्त्री॥

मपापग्रहे

संते विक्रांतंकुलमुख्यमस्थिरमतिंवित्तेश्वरंसांगिरावस्त्राणांससितःक्रियादिकुशलं राम॰

सार्किःपुनर्भूसुतं॥२॥ मूलादिस्निहकूटैर्व्यवहरतिवणिग्वाहयुद्धासत्सोम्येपुर्यध्यक्षः २२

द्विविवाहितापुत्रः मेल॰ ६ उत्कटेननामआधिक्येनफलंभवति

वरत्नई

सज्ञीवे भवति नरपतिः प्राज्ञवित्तो द्विजोवा ॥ ॥ गोपो मल्लोथ दक्षः परयुवतिरतो धूतकृत्सासु
रेज्ये दुःखार्त्तो मत्यसंघः ससवित्तनयेभ्य मिजे निंदितश्च ॥ ३ ॥ सोम्येरंगचोरो वृहस्पति पुते गी
प्रीयो न्त्यविद्वाग्मी भूगणपः सिंतेन मृदुना मापापति लुब्धकः शमहिघो धनदारवान् वहुगुणः
शुक्रेण पु[illegible]क्ते गुरौ ज्ञेयः श्मश्रुकरोसितेन घटकृज्जातोन्नकारोपिवा ॥ ४ ॥ असितसितसमा
गमेल्पचक्षुर्युवतिसमाश्रयं संप्रवृद्धवित्तः ॥ भवति च लिपिपुस्तचित्रवेत्ता कथितफलैः पर
तो परे विकल्प्या ॥ ५ ॥ इति वराहमिहराचार्य्यकृतो वृहज्जातके द्विग्रहयोगाध्यायश्चतुर्दशः ॥ १४
एकस्थैश्चतुरादिभिर्वलयुतैर्जाताः पृथक्वीर्यजैः शाक्याजीविकभिक्षुवृद्धचरकानि[illegible]र्ग्रंथ ग्र २
